अङ्क-२८
जुलाई-दिसम्बर २०१६
**वेदविद्या**
ISSN-2230-8962

# आनन्द विमर्शः

**प्रो. मिथिला प्रसाद त्रिपाठी**

आनन्द इति प्रयोगः सुखानुभूत्यै जगति को न करोति ? परन्त्वानन्द मीमांसायां विविधाः पर्यायाः शब्दाः वस्तुतः आनन्दस्य श्रेणीं नाधिगन्तारः सन्ति। यथा ब्रूतेऽमरकोशकारः द्वादशपर्यायान्।

**मुत्प्रीतिः प्रमदो हर्ष प्रमोदामोदसंमदाः।**
**स्यादानन्दथुरानन्दशर्मशातसुखानि च॥**[१]

परन्त्वत्रोक्तानां सर्वेषां पदनां व्युत्पत्तिरर्थो वा पृथगेव दृश्यते। अभिनवगुप्तस्तु "पूर्णतापरामर्शमयतां दधदानन्दउच्यते" इति आनन्दं परिभाषते। एतस्यानन्दस्य प्रथमतया प्रयोगः तैत्तिरीयोपनिषदि कृतो वर्तते। तद्यथा -

**यतो वाचो निवर्तन्ते अप्राप्य मनसा सह।**
**आनन्दं ब्रह्मणो विद्वान् न विभेति कदाचन॥**[२]

वेदान्तिनस्तु छान्दसं नपुंसकमिति आनन्दस्वरूपत्वमेव ब्रह्मणः दुःखाभावरूपस्यानन्दस्याधिकरणस्वरूपत्वादित्याहुः। एतदभिप्रायेणैव विवरणे 'आनन्दो विषयानुभवो नित्यत्वश्चेति सन्ति धर्म्माः अपृथवत्त्वेऽपि पृथारीवावभासन्ते इत्युक्तम्।

सत्यं ज्ञानमानन्दं ब्रह्मेति श्रुतिकथनादपि भवत्यानन्दस्य सत्यत्वं ज्ञानत्वं ब्रह्मत्वं निश्चितं भवति। अयमानन्दः नन्द् धातोर्घञि प्रत्ययेऽचि प्रत्यये वा अर्श आदित्वात् कृते 'नन्दः' भवति। आ उपसर्गाद् आनन्द इति भवति।

अयमेवानन्दशब्दः दुःखाभावे लाक्षणिक इत्याहुः नैयायिकाः। ब्रह्मणि आनन्दभावेऽपिदुःखाभावरूपानन्दस्य तत्र सत्त्वात् आनन्दवत्त्वमिति ते मन्यन्ते। यस्य चित्तवृत्तिर्निराकारालम्बनतया समाधौनाभिरमते तेन शब्दोपासनं कर्तव्यम्। याज्ञवल्क्यवचनं यथा -

**यथाविधानेन पठन् सामगानमविच्युतम्।**
**सावधानस्तदभ्यासात् परं ब्रह्माधिगच्छति॥**

एवं शब्दोपासनायां निरता अपि परं ब्रह्माणं प्रतिगच्छन्त्येव। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।" इति वचनम्। वाक्यपदीयकारो भर्तृहरिरपि व्यनक्ति यत् -

---

[१] अमरकोशः १/४/२४-२५
[२] तैत्तिरीयोपनिषद् २/४

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥**

एवमेव गायका अपि शब्दोपासका एव भवन्ति। तेऽपि स्वगतिं गायनादेव लभन्ति।

**वीणावादन तत्त्वज्ञः श्रुतिजातिविशारदः।**
**तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति॥**
**गीतज्ञो यदि योगेन नाप्नोति परमं पदम्।**
**रुद्रस्यानुचरो भूत्वा सहतेनैव मोदते॥**

इति याज्ञवल्क्य वचनैरपि शब्दोपासना फलवती भवति। परन्तु शब्दस्पर्शरूपरसगन्धानाश्रित्योपासना कृता विषयानन्दतां एव गाहते।

ब्रह्मानन्दस्य मीमांसायां शारीरकभाष्ये ब्रह्मनिर्वचनं यथा - "अस्ति तावन्नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितं ब्रह्म" भर्तृहरिरपि (३/८४) ब्रूते यत् - "समीभूतादृष्टिस्त्रिभुवनमपि ब्रह्ममनुते" मनुस्मृत्यां (२/८३) 'ओमित्येकारं ब्रह्म' इत्युक्तम्। यदा 'अहं ब्रह्मास्मि' 'तत्त्वमसि' इत्यादि बोधानन्तरं अखण्डाकाराकारिताचित्तवृत्तिः संवलिता भवति तदा क्वचिदनुभवः ब्रह्मणः भवतीति। परन्तु ब्रह्मानन्दोऽयं वेदान्तमते प्रसिद्धः। लोकोत्तरतामेति आनन्दोऽयम्। तथैव ब्रह्मानन्दवदेव काव्यानन्दोऽपि विपश्चितां सम्मतः। एतस्य कृते साहित्यशास्त्रिणः स्वस्वमतानि प्रकटयां चक्रुः। भरतः "विभावानुभावव्यभिचारि संयोगाद्रसनिष्पत्तिः" इति सूत्रयति। मम्मटस्तु 'विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा रसतामेतिरत्यादिः स्थायी भावः सचेतसाम्॥

एवं लोकानन्दस्य विवृताः पद्धतयः। यो हि यस्य प्रिय जनः वस्तु तं जनं तदवस्तु वा प्राप्य तदर्थं आनन्दितो भवति जागतिकः कश्चन परन्तु विषयानन्दस्तु लोकानन्दः सात्विकः त्याज्या एव भोगरूपः। साङ्ख्यसूत्रे "चिदवमानो भोगः" इति कथनम्। प्रत्यभिज्ञादर्शनेऽपि भोग एव मोक्षः। तस्याः भोक्त्र्याः स्वतन्त्रतायाः भोग्यैकीकार एव सः।

**स एव भोगः सा मुक्तिः तदेव परमं पदम्॥**

यद्यत्यत्र शक्तिरेव भोक्त्र सा एव मुक्तिस्वरूपिणी भवत्यपि। परन्तु पुराणेषु -

**न जातुकामः कामानामुपभोगेन साम्यति।**
**हविषा कृष्णवर्त्मेव भूय एवभिवर्द्धते॥**

विष्णुपुराणेऽपि -

**गृहीतानिन्द्रियैरर्थानात्मने यः प्रयच्छति।**
**अन्तःकरणरूपाय तस्मै विश्वात्मने मनः॥**

वृहदारण्यकोपनिषदि (४/१/६) प्रोक्तमपियत् - मन एवायतनमाकाशः प्रतिष्ठानन्द इत्येतदुपासीत। काऽऽनन्दता याज्ञवल्क्य। मन एव सम्राडिति होवाच मनसा वै सम्राट् स्त्रियमभि हर्यति तस्यां प्रतिरूपः पुत्रो जायते स आनन्दः॥

एवमेवाग्रेऽपि वृहदारण्यकोपनिषदि (४/३/३३) प्रोक्तम् यत् - स यो मनुष्याणां राद्धः समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानुष्यकैः भोगैः सम्पन्नतमः स मनुष्याणां परम आनन्दः। अथ ये शतं मनुष्याणामानन्दाः स एकः। पितृणां जितलोकानामानन्दः स एको गन्धर्वलोक आनन्दः। अथ ये शतं गन्धर्वलोक आनन्दाः स एकः कर्म देवानामानन्दो ये कर्मणा देवत्वमभिसंपद्यन्ते। अथ ये शतं कर्म देवानामानन्दाः स एक आजानदेवानामानन्दः। यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये शतमाजानदेवानामानन्दाः स एकः प्रजापति लोक आनन्दः। यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये शतं प्रजापतिलोकः आनन्दाः स एको ब्रह्मलोक आनन्दः। यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथैक एव परमआनन्दः॥

एवमेव आनन्दस्य सरणिमुदाहृत्य ब्रह्मता तत्र स्वीकृता यथा तैत्तिरीये उपनिषदि (३/६) आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद् ह्येव खल्विमानि भूतानि जायन्ते। आनन्देनजातानि जीवन्ति। आनन्दं प्रयन्त्यभिविशन्ति।

एवं आनन्द एव सृजति पालयत्युपसंहरत्यपि। आनन्दमभिलिप्सवः जगति येनकेनापि प्रकारेणतमुपासन्ते उद्भूतेनान्यदभिभूयते। तथा हि सत्त्वं रजस्तमसी अभिभूय शान्तमातनो वृत्ति प्रतिलभते एवं रजः सत्त्वमसी अभिभूयघोराम् एवं तमः सत्त्वरजसी अभिभूय मूढमिति।

**प्रीत्यप्रीतिविषादाद्यैर्गुणानामन्योन्यं वैधर्म्यम्।** भा.सू.

'गुणानां मत्वादिद्रव्यादित्रयाणामन्योन्यं सुखदुःखविषादाद्यैर्वैधर्म्यम् कार्येषु तद्दर्शनादित्यर्थः सुखादिकं च घटादिविषयाणामपि रूपवदेव धर्म्मोऽन्तः करणोपादानत्वात् सर्वकार्याणां तत्तद् गुणौचित्यात्।

हेयं दुःखमनागतम् - इत्युपक्रम्य पुनः पातञ्जलसूत्रस्य द्रष्टृदृश्य संयोगो हेयहेतुः इति दृश्यपदार्थनिरूपणं प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम्। पा.सू.

प्रकाशशीलं सत्वम् क्रियाशीलं रजः प्रकाश क्रिययोः प्रतिबन्धरूपस्थिति शीलं तमः।

**जगति सुखं तु काम्यमेव वर्तते तदर्थं इच्छैवहेतुः।**
**सुखन्तु जगतामेव काम्यं धर्मेण जायते।**
**अधर्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम्॥**
**निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेवजायते।**
**इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि**
**चिकीर्षाकृतिसाध्यत्व प्रकारेच्छा च या भवेत्।**
**तद्धेतुः कृति साध्येष्टसाधनत्वमतिर्भवेत्।**
**बलवद्दुद्दिष्ट हेतुत्वमतिः स्यात् प्रतिबन्धिका।**
**तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते।**
**दिष्ट साधनताबुद्धिर्भवेद् द्वेषस्यकारणम्॥**

तत्र सुखं प्रथमं द्विविधं ज्ञानप्रसादलब्धं ब्रह्मानन्दाद्यपर पर्य्यायं निरतिशयम् वैषयिकं सातिशयञ्च। सुखादिकञ्च अन्तः करणधर्मः धर्माधर्मफलत्वात् "शास्त्रदेशितं फलमनुष्ठातरीति" त्रिविधं सुखं सात्विकराजसतामसभेदेने गीतायामुक्तम्।

वैषयिकं सुखं क्षणिकत्वात् परिणामादिदुःखरूपत्वाच्च विवेकिभिः त्याज्यत्वमेव। "त्याज्यं सुखं विषयसङ्गमजन्मपुंसाम्॥"

स किम् ? अस्माल्लोङ्कात प्रेत्य दृष्टादृष्टविषयसमुदायो ह्ययं लोकस्तस्मादस्माल्लोकात् प्रेत्य प्रत्यावृत्य निरपेक्षो भूत्वा एवं यथे व्याख्यातम् अन्नमयमात्मानमुपसंक्रामति विषय जातमन्त्र मयात् पिण्डात्मनो व्यतिरिक्तं न पश्यति सर्वं स्थूलभूतमन्नमयमात्मानं पश्यतीत्यर्थः। ततोऽभ्यन्तरमेतं प्राणमयं सर्वान्नमयात्मरुस्थमविभक्तम्। अथैतं मनोमयं विज्ञानमयमानन्दमयमात्मानमुपसङ्क्रामति। अथाऽदृश्येऽनात्म्येऽनिरुक्तेऽनिलयेऽभयं प्रतिष्ठां विन्दते तत्रैव नान्यत्र च। शाङ्करभाष्यमिदं वितनुते।

अत्र प्रसङ्गात् सुखदुःखादीनां स्वरूपकारणादिकं तावत् निरूप्यते प्रकृतेः सुखदुःखमोहात्मकसत्त्वरजस्तमोगुणरूपत्वात् सुखादीनां सत्त्वादिकार्यत्वम्। यथोक्तम् सांख्यकारिकायाम् -

**प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।**
**अन्योन्याभिभवाश्रयजननमिथुनसमवृत्तयश्चगुणाः॥**

व्याख्या - प्रीतिः सुखं प्रीत्यात्मकः सत्वगुणः अप्रीतिर्दुःखं अप्रीत्यात्मको रजोगुणः विषादो मोहः विषादात्मकस्तमोगुण इति। ये तु मन्यन्ते न प्रीतिर्दुःखाभावादतिरिच्यते एवं दुःखमपि न प्रीत्यभावादन्यदिति तान् प्रत्यात्मग्रहणम्। नेतरेतराभावाः सुखादयः अपितु भावाः आत्मशब्दस्य भाववचनत्वात् प्रीतिरात्मा भावो येषां ते प्रीत्यात्मानः। एवमन्यदपिव्याख्येयम्। भावरूपता चैषामनुभवसिद्धा परस्पराभावात्मकत्वे तु परस्पराश्रयायत्तेरेकस्यात्यासिद्धेरुभयासिद्धिरिति भावः। स्वरूपमुक्त्वा प्रयोजनमुच्यते। प्रकाशप्रवृत्तिनियमार्थाः अत्रापि यथासङ्ख्यमेव। रजः प्रवर्त्तकत्वात्सर्वत्र लघुसत्वं प्रवर्त्तयेत् यदि तमसा गुरुणा न नियम्येत। तमोनियतन्तु क्वचिदेव प्रवर्त्तयतीति भवति तमो नियमार्थम्। प्रयोजनानन्तरं क्रियामुच्यते - अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च वृत्तिः क्रिया सा च प्रत्येकमभिसम्वध्यते। अन्योन्याभिभववृत्तयः एषामन्यतमेनार्थवथाक्।

प्रजापति विराट् त्रैलोक्यशरीरे ब्रह्मा। समष्टिव्यष्टिरूपः संसारभरणरूपिव्यापी । यत्रैव आनन्दभेदा एकतां गच्छन्ति। धर्मश्च तन्निमित्तिंज्ञानञ्च तद्विषयमकामहतत्त्वं च निरतिशयं यत्र स एव हिरण्यगर्भो ब्रह्मा तस्यैव चानन्दः श्रोत्रियेणावृजिनेनाकामहतत्त्वेन च सर्वतः प्रत्यक्षमुपलभ्यते। तस्मादेतानि त्रीणि साधनानीत्यत्र गम्यते। तत्र श्रोत्रियत्वावृजिनत्वे नियते अकामहतत्त्वं तूत्कृष्यते इति प्रकृष्ट साधनतावगम्यते। तस्य तस्याकामहतत्त्वं प्रकर्षतश्चोवलभ्यमानः श्रोत्रियप्रत्यक्षो ब्रह्मण आनन्दो यस्य परमानन्दस्य मात्रा एकदेशः। "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीव न्तीति" श्रुत्यन्तरात्। स एष आनन्दो यस्य यात्रा समुद्राम्भस इव विप्रषः प्रविभक्ता यत्रैकताङ्गताः स एष परमानन्दः स्वाभाविकोऽद्वैतत्वात्। आनन्दानन्दिनोश्चाविभागोऽत्र। तदेतन्मीमांसा फलमुपह्यते स यश्चायं पुरुष

इति। गुहायां निहितः परमे व्योम्याकाशादिकार्यं सृष्ट्वाऽन्नमयान्नं तदेवानुप्रविष्टः स च इति निर्दिश्यते। स एकोऽसावयं पुरुषः यश्चासावादित्ये यः परमानन्दः श्रोत्रिय प्रत्यक्षो निर्दिष्टो यस्यैकदेशं ब्रह्मादीनि भूतानि सुखार्हाण्युप जीवन्ति स यश्चासावादित्ये इति स एकः। तं मीमासया च सिद्धमुपसंहृतं भिन्नप्रदेशस्यघटाकाशाकाशैकवत्।

नन्वानन्दस्य मीमांसा प्रकृता तस्य अपि फलमुपसंहर्तव्यम्, अभिन्नः स्वाभाविक आनन्दः परमात्मैव न विषयविषयिसम्बन्धजनित इति। ननु तदनुरुप एवायं निर्देशः स यश्चायं पुरुषे यश्चासावादित्ये स एक इति भिन्नाधिकरणस्यविशेषोप मर्दनेन। नन्वेवमत्यादित्यविशेषणग्रहण-मनर्थकम्। नानर्थकम् उत्कर्षापकर्षावोहार्थत्वात्।

द्वैतस्य हि यो मूर्तामूर्तलक्षणस्योत्कर्षः सवित्रभ्यन्तरगतः स चेत् पुरुषगतविशेषोपमर्देन परमानन्दमयेक्ष्य समोभवति न कश्चिदुत्कर्षोऽपकर्षोवा तां गतिं गतस्येत्युभयं प्रतिष्टां विन्दत इत्युषवन्नम्।

स यः कश्चिदेवं यथोक्तं ब्रह्मोत्सृज्योत्कर्षापकर्षमद्वैतं सत्यं ज्ञानमनन्तं अस्मीति। एवं शब्दस्य प्रकृतपरामर्शार्थत्वात्।

निरस्तेऽविद्याकृते विषयविषयिविभागे विद्यया स्वाभाविकः परिपूर्ण एक आनन्दोऽद्वैते भवतीत्येतमर्थं विभावयिष्यन्नाह - युवा प्रथमवयाः साधुयुवेति। साधुश्चासौ युवाचेति यूनो विशेषणम्। युवाऽप्यसाधुर्भवति साधुरप्ययुवाऽतो विशेषणं युवा स्यात् साधुयुवेति।

आध्यायिकोऽधीतवेदः। आशिष्ठ आशास्तृतमः। द्रढिष्ठो दृढतमः। बलिष्ठो बलवत्तमः। एवमाध्यात्मिकसाधनसम्पन्नः। तस्येयं पृथिवी उर्वो सर्वा वित्तस्य वित्तेनोपभोगसाधनेन दृष्टार्थेन च कर्मसाधनेन सम्पन्ना पूर्णा। राजापृथिवीपतिरित्यर्थः। तस्य च य आनन्दः स एको मानुषो मनुष्याणां प्रकृष्ट एक आनन्दः। तेये शतं मानुषा आनन्दाः स एको मनुष्यगन्धर्वाणामानन्दः। चतुष्पादानन्दाच्छतगुणेनोत्कृष्टो मनुष्यगन्धर्वाणामानन्दो कारणाः। तस्मात् प्रतिघातात्पत्वं तेषां द्वन्द्व प्रतिघातशक्तिसाधनसम्पत्तिश्च। ततोऽप्रतिहम्यमानस्य प्रतिकारवतो मनुष्यगन्धर्वस्य स्याच्चित्तप्रसादः। तस्य प्रसादविशेषात् सुखविशेषभिव्यक्तिः। एवं पूर्वस्याः पूर्वस्या भूमेरुत्तरस्यामुत्तरस्यां भूमौ प्रसादं विशेषतः शतगुणेनोत्कर्ष उपपद्यते। प्रथमन्त्वकामहताग्रहणं मनुष्य विषयभोगकामनभिहतस्य श्रोत्रियस्य मनुष्यानन्दाच्छतगुणेनानन्दोत्कर्षो मनुष्यगन्धर्वेण तुल्यो वक्तव्य इत्येवमर्थं साधु युवाध्यायिक इति श्रोत्रियत्वावृजिनत्वे गृह्येते। ते ब्रह्मविशिष्टे सर्वत्र। अकामहतत्त्वं तु विषयोत्कर्षापकर्षतः सुखोत्कर्षापकर्षाय विशिष्यते। अतोऽकामहतग्रहणम्। तद्विशेषतः शतगुणात् सुखोत्कर्षोपलब्धेरकामहतत्त्वस्य परमानन्दप्राप्ति साधनत्वविधानार्थम्। चिरकालस्थायी लोको येषां पितृणां ते चिरलोका इति। आजान इति देवलोकस्तस्मिन्नाजानेजाता आजानजा देवाः स्मार्तकर्म विशेषतो देवस्थानेषु जाताः। कर्म्मदेवा ये वैदिकेन कर्म्मणा अग्निहोत्रादिना केवलेन देवानपि यन्ति। देवा इतित्रयस्त्रिंशद् हविर्भुजः। इन्द्रस्तेषां स्वामी तस्याचार्यो बृहस्पतिः ते ये शतं देवगन्धर्वाणामानन्दाः य एकः पितृणां चिरलोकानामानन्दः। श्रोत्रियस्यचाकाब्रामहतस्य। ते ये शतं पितृणां चिरलोकानामानन्दाः।

स एक आजानजानां देवानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतमाजानजानां देवानामानन्दाः स एकः कर्मदेवानामानन्दः ये कर्मणा देवानपयन्ति, श्रोत्रियस्यजाकामहतस्य ते ये शतं कर्मदेवानांदेवानामानन्दाः। स एको देवानामानन्दः श्रोत्रियस्यचाकामहतस्य। ते ये शतं देवानामानन्दाः। स एक इन्द्रस्यानन्दः श्रोत्रियस्य चाकामहतस्य। ते ये शतमिन्द्रस्यानन्दाः। स एको बृहस्पतेरानन्दः। श्रोत्रियस्यचाकामहतस्य। ते ये शतं बृहस्पतेरानन्दाः। स एकः प्रजापतेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं प्रजापतेरानन्दाः। स एको ब्रह्मण आनन्दः। श्रोत्रियस्य चाकामहतस्य।[३] स यश्चायं पुरुषे यश्चासावादि त्ये स एकः। स य एवं विद् अस्माल्लोकात्प्रेत्य एतमन्नमयमात्मानमुपसंक्रामति। त एतं प्राणमयमात्मानमुपसंक्रामति। एतं मनोमयमात्मानमुपसंक्रामति। एतं विज्ञानमयमात्मानमुपसंक्रामति। एतमानन्दमययात्मानमुपसंक्रामति।

तस्यास्य ब्रह्मण आनन्दस्यैषा मीमांसा विचारणा भवति किमानन्दस्य मीमांस्यमुच्यते। किमानन्दो विषयविषयिसम्बन्ध जनितो लौकिकानन्दवदाहोस्वित् स्वाभाविक इत्येवमेषानन्दस्य मीमांसा। तत्र लौकिकानन्दवदाहोस्वित् स्वाभाविक इत्येव मेषा आनन्दस्य मीमांसा।

तत्र लौकिक आनन्दो बाह्याध्यात्मिकसाधनसम्पत्ति निमित्तउत्कृष्टः। स य एष निर्दिदश्यते ब्रह्मानन्दानुगमार्थम्। अनेन हि प्रसिद्धेनानन्देन व्यावृत्तविषयबुद्धिगम्य आनन्दोऽनुगन्तुं शक्यते। लौकिकोऽप्यानन्दो ब्रह्मानन्दस्यैव मात्राऽविद्यया तिरस्क्रियमाणोऽविजातो उत्कृष्यमाणायां चाविद्यायां ब्रह्मादिभिः कर्म्मवशाद्यथाविज्ञानं विषयादिसाधन सम्बन्ध वशो विभाव्यमानश्च लोकेऽनवस्थितो लौकिकः सम्पद्यते स एवाविद्याकामकर्म्मापकर्षेण मनुष्यगन्धर्वाद्युत्तरोत्तरभूमि स्वकामहतविद्वत् श्रोत्रियप्रत्यक्षो विभाव्यते शतगुणोत्तरोत्तरोत्कर्षेण यावद्धिरण्यगर्भस्य ब्रह्मण आनन्द इति।

**प्रो. मिथिला प्रसाद त्रिपाठी**
प्रोफेसर
कुरुक्षेत्र विश्वविद्यालयः, कुरुक्षेत्रम्

[३] तै.उ. (२/८/१-५)